International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 156-161
© 2022 IJSR
www.anantaajournal.com
Received: 09-11-2021
Accepted: 23-12-2021

**भोलेश्वरप्रधानः**
शोधछात्रः, संस्कृतविभागः,
राजा श्रीरामचन्द्र भञ्जदेव
विश्वविद्यालयः, द्वितीयपरिसरः,
केन्दुझरम्, ओडिशा, भारत

**Corresponding Author:**
**भोलेश्वरप्रधानः**
शोधछात्रः, संस्कृतविभागः,
राजा श्रीरामचन्द्र भञ्जदेव
विश्वविद्यालयः, द्वितीयपरिसरः,
केन्दुझरम्, ओडिशा, भारत

# प्राच्यपाश्चात्याचार्ययो: अरस्तूभरतयोः नाट्यतत्त्वविचारः

**भोलेश्वरप्रधानः**

**प्रस्तावना**

- पाश्चात्यविद्वान् अरस्तुमहोदयः काव्यशास्त्रं विरच्य तत्र तेषां परम्परामवलम्ब्य नानादर्शनविज्ञानादिकं च आविस्कृतवान्। तथैव समसामयिके सञ्जातः भरतमुनिः प्राच्यपरम्परामनुसृत्य स्वप्रतिभयाऽपि नाट्यतत्त्वविषये विद्यमानां मौलिकसमानतां प्रकटयामास।
- भरतमुनिः लोकवृत्तानुकरणम्, लोकस्वभावानुकरणम्, कृतानुकरणम् च विषयेषु स्वग्रन्थे अनुकरणात्मकसिद्धान्तरूपेण वर्णयति। अरस्तुमहोदयोऽपि स्वीकरोति – कथानकम्, चरित्रचित्रणम्, विचारतत्त्वम्, चानुकृतेः विषयः। दृश्यविधानम् अनुकृतेः माध्यमम्। पदरचना तु अनुकरणस्य विधिरेव।
- भाषा योजनाविषये अनयोः मतं साम्यम्। शब्दप्रयोगैः, मृदुललितपदार्थैः, गुणालङ्कारैश्च भाव्यमिति भरतमुनिना स्वीकृतम्। अरस्तुमहोदयोऽपि भाषा-छन्दोलयगीतादिभिः, सर्वविधैः अलङ्कारैश्च अलङ्कृता इति स्वीकरोति।
- अरस्तुभरतयोः नाट्यतत्त्वविषये बहुषु स्थलेषु समानता दृश्यते। कथावस्तुनः आयामः, कथानकसैकान्वितिः, कथावस्तुनः पूर्णता, कथावस्तुनः सम्भाव्यता, इतिवृत्तस्य सहजविकासः, कुतूहलप्रभृतिविषयेषु अनयोः नाट्यतत्त्वं प्रायः समानमेव।

प्राच्यपाश्चात्यविद्वांस: नानापुस्तकानि विरच्य स्वप्रतिभाभिरेव नाट्यतत्त्वानि निरुपितानि सन्ति। तेषु पाश्चात्यविद्वान् प्रसिद्धदार्शनिक: अरस्तूमहोदय: अन्यतमः । य: यवनदेशे ख्रीष्टपूर्वे चतुर्थशतके (३८४-३२२) अजायतेति समालोचकाः कथयन्ति। सः स्वपाण्डित्यबलेन पाश्चात्यसभ्यतामनुसृत्य विविधदर्शन-ज्ञान-विज्ञानं च आविष्कृतवान्। काव्यशास्त्रे अपि अपूर्वां प्रतिभां प्रदर्शयामास। असौ दार्शनिक: काव्यशास्त्रं (Aristotle's poetics) तथा रीतिशास्त्रं (Rhetorics) नामकं ग्रन्थद्वयं विरच्य विद्वद्वराणां मानसं मोदयति स्म।

तदवदेव भारतभूमौ समसामयिके प्राचीनकाले महामुनिः भरत: जन्म बभूव। तस्य काल: ख्रीष्टपूर्वे चतुर्थशतके आसीदिति समालोचका: मतमाप्नुवन्ति। ज्ञान-विज्ञान-कलासमन्वितं ग्रन्थेऽस्मिन् ३६ अध्यायाः सन्ति। देशकालसंस्कृतिषु तारतम्यता स्थिताऽपि अरस्तूभरतयो: नाट्यतत्त्वविचारे विद्यमाना या मौलिकसमानता विदूषां चेत: चमत्कारसिद्धा।

अरस्तूमहोदयस्य नाट्यकाव्यविषयकविचारा: भारतीयविचारधारानुकुलताम् अभिन्नतां च प्रदर्शयन्ति। महामुनिभरतेन स्वग्रथिते नाट्यशास्त्रे प्रथमाऽध्याये नाट्यस्वरूपं समुपस्थापयति। यथा –

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।[1]
नाना भावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।[2]
सप्तद्वीपानुकरणं नाट्ये ह्यस्मिन् प्रतिष्ठितम्।
देवतानामृषिणां च राज्ञामथकुटुम्बिनाम्।
कृतानुकरणं लोके नाट्यमित्यभिधीयते ।।[3]
लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम्।।[4]

अनेन प्रकारेण 'लोकवृतानुकरणम्, ' 'अवस्थानुकरणम्' नाट्यमिति तेन स्वीकृतम्। तस्मिन्नेव ग्रन्थे २१ तमेऽध्याये नाटकं निरूपयति यत् –

सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम्।
मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम्।।[5]
मृदुशब्दं सुखार्थं च कवि: कुर्यात्तु नाटकम्।।[6]

अपि च तस्मिन्नेव ग्रन्थस्य १७ अध्याये १२३ तमे श्लोके नाटकं निरूपयति भरतमुनि: -

मृदु-ललित-पदार्थं गूढशब्दार्थहीनं
बुधजनसुखयोग्यं बुद्धिमन्नृत्ययोग्यम्।
बहुरसकृतमार्गं सन्धिसन्धानयुक्तं
भवति जगति योग्यं नारकं प्रेक्षकाणाम्।।[7]

महामुनेः भरतस्य अभिप्राय: भवति- अनुकरणात्मकरूपकस्य दशप्रभेदेषु प्रधानतमस्य नाटकस्य रसाभिव्यञ्जकैः कोमललालित्यशब्दार्थैश्च शरीरं विधेयम्। अर्थात् नाट्यकार: भरतमुनिः स्वकीये नाट्यशास्त्रे 'लोकवृत्तानुकरणम्', लोकस्वभावानुकरणम', 'कृतानुकरणम्' इत्यादि यद् नाट्यविषये प्रतिपादयति, तत्र 'अनुकरणम्' नटेन प्रदर्शितम्। यदि शङ्कामुपजायते किम् अनुकार्यस्य कार्यकलापस्य अभिनयरूपम्? कविना निरूपितं जागतिकपदार्थस्य वर्णनात्मकं कविकर्मरूपम्? एतद्शङ्कानिवारणाय भरतमुनिना उक्तं - नटद्वारा कृतम् अभिनयरूपमेव अनुकरणम्। एतस्मिन् विषये आलङ्कारिक: राजानकमम्मट्टाचार्य: स्वरचिते काव्यप्रकाशे चतुर्थोल्लासे भरतमुनेः अनुयायिनां भटलोल्लट-अभिनवगुप्त-धनञ्जय-धनिकादीनां रसनिरूपणावसरे कथयति- 'मुख्यया' वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस: [8] । अभिनवभारत्याम् - नहि नटो रामसादृश्यं स्वात्मन:शोकं करोति, सर्वस्यैव तस्य तत्राभावात् भावेनानुकारत्वात् [9], धनञ्जयकृते दशरूपके – अवस्थानुकृतिर्नाट्यम् [10], विश्वनाथकविराजस्य साहित्यदर्पणे तृतीयपरिच्छेदे अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत्, अनुकर्तृगतत्वं चास्य निरस्यति [11]। प्रोक्तकथनेषु ज्ञायते- रङ्गमञ्चे अनुकारकनटद्वारा प्रदर्शितं धिरोदात्तप्रभृतिनायकानां नानावस्थानाम् आङ्गिक-वाचिक-आहार्यसात्विकाश्च चत्वारोऽभिनयरूपं प्रयोगात्मकमेव अनुकरणं प्रतिभाति । परन्तु सूक्ष्मातिसूक्ष्मतया अवलोकनेन नवनिर्माणात्मकं कविव्यापाररूपमपि अनुकरणमिति भरतमुनिप्रभृतिविपश्चितां मतम्। इत्यस्मिन् विषये भरतमुनि: स्वग्रन्थे प्रथमाध्याये स्पष्टरूपेण निरूपयति यत् –

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजनजनं नाट्यमेतद् भविष्यति।।
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न स योगं न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते ।।
वेदविद्येतिहासानामाख्यानपरिकल्पनम् ।
विनोदजननं काले नाट्यमेतद् भविष्यति ।।[12]
अस्मिन्नेव ग्रन्थे २१ तमेऽध्यायेऽपि एतद् विषये वर्णित: भवति। [13]

अनेन कथनेन अयमेव आशय: भवति यत् - कविव्यापाररूपम् अपि लोकवृत्तानुकरणं भवति । अत एव भरतमुनिना रङ्गमञ्चोपयोगिनां बहिरङ्गरूपाणां

चतुर्विधाभिनेयानां तथा नाट्यान्तरङ्गरूपाणां मुख्यभूतानां रसभावादीनामपि विस्तरत्वेन निरूपितम्।

अनुकार्यवृत्तस्य अनुकर्तृभिः कृतम् अभिनयरूपम् अनुकरणं तत् तादात्म्यापादनरूपं सदेव शोभनं भवति, परन्तु कविकृतं लोकवृत्तानुकरणं कवे: प्रतिभा-व्युत्पत्ति-अभ्यासादेव नवनिर्माणरूपं सदेव सहृदयह्लादकं भवति। काव्ये कवि: वस्तुन: त्रयरूपाणाम् अनुकरणं करोति कर्तुं वा शक्नोति। यथा -

(१) (कविहृदये) वस्तुन: प्रतीयमानरूपस्य

(२) वस्तुन: सम्भाव्यरूपस्य (यथा तद्रूपं भवितुमर्हति)

(३) वस्तुन: आदर्शरूपस्य (यथा तेन रूपेण भाव्यम्) इति।

यत: कविकर्मण: साफल्यं वस्तुन: अनुकरणे प्रतिभाया: कल्पनायाश्च समुपयोग: भवति तथैव अनुकरणेन काव्यनिबन्धनं धर्म्यं, यशस्यमायुष्यं, हितं बुद्धिविवर्द्धनं लोकोपदेशजननं, धर्मार्थकाममोक्षरूपं चतुर्वर्गसाधनं च भवति।

अरस्तूमहोदय: अनुकरणात्मककलासु उत्कृष्टतमाया: त्रासदया: लक्षणं दर्शयति । 'त्रासदी कस्यचित् गम्भीरस्य, स्वत: पूर्णस्य निश्चितायामनुक्तस्य कार्यस्य अनुकृतिः, यस्याः अनुकृते: माध्यमं नाटकस्य नानाभागेषु नानारूपेण प्रयुक्ता सर्वविधैः अलङ्कारैः अलङ्कता भाषा भवति। यत्र च त्रासकरुणयो: उद्रकेण मनोविकाराणां समुचितविरेचनं भवति।[14]

**एतत् लक्षणानुसारेण -**

(१) कार्यस्य अनुकृते: नाम त्रासदी।

(२) कार्यमिदं गम्भीरं स्वत:पूर्ण निश्चितायाम् अयुक्तं च भवति ।

(३) अस्य कार्यस्य वर्णनं न भवति, परन्तु प्रदर्शनं भवति।

(४) भाषा छन्दोलयगीतादिभि: अलङ्कृता भवति।

(५) त्रासकरुणयो: उद्रेकद्वारा तादृशानां मनोविकाराणां विरेचनं भवति, येन त्रासदया: प्रयोजनस्य आनन्दानुभवस्य सिद्धिः जायते। अस्मात् कारणात् त्रासदया: अनिवार्यरूपेण षडङ्गानि भूत्वा तस्या: सौन्दर्य्यस्य निर्धारणं कुर्वन्ति। तानि यथा - कथानक-चरित्रचित्रण-पदरचना-विचारतत्व-दृश्यविधान-गीतानि च। एतेषु कथानकं, चरित्रचित्रणं,विचारतत्त्वं चानुकृतेः विषयः। दृश्यविधानम् अनुकृते: माध्यमम्, पदरचना गीतं तु अनुकरणस्य विधिरेव।[15]

पाश्चात्यदार्शनिक: प्लेटोमहोदय: कथयति- जगत् पारमार्थिकसत्यस्य अनुकरणम्, तस्य अनुकरणं काव्यमिति अनुकृते: अनुकरणतया काव्यं सत्यात् । अतीव दूरतरम्, अत; काव्यं हेयम्। एतन्मतं निरस्य अरस्तूमहोदयः कथयति- काव्यात्मकम् अनुकरणं न यथावत् अनुकरणम् अपि तु प्रेयश्रेयसमन्वितम् आदर्शरूपमिति। अर्थात् अरस्तूमहोदयस्य मतानुसारे इतिहासाद् काव्यं भव्यतरम् । इतिहासे घटनाया: यथावत् वर्णनं भवति, परन्तु काव्ये तस्या: तथा वर्णनं भवति यथा तया घटनया भाव्यम्। काव्ये दार्शनिकचिन्ताधारा वर्त्तते, अत: इतिहासाद् महत्तरं काव्यम्। काव्यस्य कथावस्तु सार्वभौमं सार्वकालिकं च, परन्तु इतिहासस्य कथावस्तु देशकालविशेषपरिछिन्नम्[16]। अत: अनुकरणसिद्धान्ते अरस्तूभरतयो: मतं साम्यं भवति।

**भाषा: -**

नाट्यकार: भरतमुनि: नाटकस्य भाषाविषये स्वरचिते नाट्यशास्त्रे २१ तमेऽध्याये, १७ तमेऽध्याये च वर्णिता: सन्ति । यथा –

षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम्।[17]
शब्दानुदारमधुरान् प्रमदाभिनेयान्।[18]
मृदुललितपदार्थं गुढशब्दार्थहीनम्।[19]

अर्थात् नाटकस्य शब्दप्रयोगैः मृदुललितपदाथैः, प्रमदाभिनयैः, गुणालङ्कारभूषितैः, षट् त्रिंशल्लक्षणैः, भाव्यमिति भरतमुनिना निरूपितम्। तथैव अरस्तूमहोदयोऽपि त्रासदया भाषा छन्दोलयगीतादिभि: सर्वविधैः अलङ्कारैश्च अलङ्कृता इति स्वीकरोति। अत: अनयो: विचारे साम्यताम् आगछति।

**नाट्यकाव्यकथावस्तु -**

महामुनिभरत: स्वग्रन्थे २१ तमेऽध्याये कथयति- काव्यस्य शरीरम् इतिवृत्तं (इतिहासं) भवति। तत्र पञ्चसन्धयः सन्ति। तदेव इतिहासप्रसिद्धं कविकल्पितरूपमुत्पाद्यं चेति द्विविधम्। यथा –

इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम्।
पञ्चभिः सन्धिभिस्तस्य विभागा: परिकीर्तिताः।।
इतिवृत्तं द्विधा.......................................
आधिकारिकमेकं तु प्रासङ्गिकमथापरम्।।[20]

अरस्तूमहोदयोऽपि स्वीकरोति कथावस्तु घटनानां विन्यासरूपमेव, यदेव काव्यव्यापारस्य अनुकरणरूपं भवति। एतच्च कथानकं त्रासदया: सर्वप्रधानं वस्तु। एतदेव एतस्या: आत्मरूपम्।[21]

अरस्तूमहोदय: अनेन प्रकारेण कथानकस्य महत्त्वं प्रतिपादयति –

(१) त्रासदया: व्यक्ते: अनुकरणं न भवति, अपि तु कार्यजीवनयो: अनुकरणं भवति।

(२) कार्यव्यापारस्य अपरनाम जीवनम् ।अत: जीवनस्य अनुकृतौ कार्यव्यापारस्य एव प्रमुखतां भजते ।

(३) सुखं दुःखं वा काव्यजन्यप्रभावस्य स्वरूपम्। तच्च कार्यकलापे एव निर्भरम्। अत: कार्यं कथानकं वा त्रासदया: साध्यं भवति।

(४) चरित्रचित्रणं कार्यव्यापारेण सार्द्धं गौणरूपेण स्वत एव तिष्ठति।

(५) त्रासदी चरित्रचित्रणं विना भवितुं शक्नोति, परन्तु कार्यव्यापारं विना भवितुं न शक्नोति।

(६) चारित्र्यस्य अभिव्यञ्जकानि भाषणविचारादीनि सर्वथा परिष्कृतानि अपि तथा सारभूतकारुणिकप्रभावं नोत्पादयन्ति यथा कथानकानां घटनानां च कलात्मकविधानि।

(७) त्रासदया: प्रबलतमं रागात्मकत्वं स्थितिविपर्ययस्य अभिज्ञानरूपं कथानकस्य एव अङ्गम्। एतावता अरस्तूमहोदयस्य मते कथानकस्य सर्वाधिकं महत्वं सुस्पष्टम्। अत्र यदेव रहस्यं तदेव अधस्तात् प्रतिपादयति सः ।

तस्मिन्नेव काले समुपलब्धेषु साहित्येषु कथानकस्य प्रामुख्येण, वस्तुवादीदृष्टिकोणे अमूर्तभावादि वर्णनापेक्षया मूर्तसंघटनादिवर्णनस्य एव अधिकमहत्त्वेन, अनुकरणसिद्धान्ते चरित्रचित्रणादि अपेक्षया कथावस्तुवर्णनस्य सहजतया रसभावचरित्रवर्णनस्यापि माध्यमतया इतिवृत्तस्य एव सत्त्वेन अरस्तूमहोदय: नाटकादौ कथानकस्यैव माहात्म्यं प्रतिपादयामास।

नाट्यकार: भरतमुनिः प्रतिपादयति- 'इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम्' इति। नाट्ये शरीररूपेण स्थितकथानकात् 'नहि रसादृते कश्चिदर्थः प्रवर्त्तते'[22] एवं प्रतिपाद्य प्रधानीभूतस्य रसस्य आत्मरूपत्वं सुस्थिरिकृतं तेन। भारतीयनाट्यदर्शने वस्तु-नायक-रसेषु रस एव मुख्य:। वेदानुसारे 'रसो वै स:' इत्यत्र रस एव आत्मस्वरूपम्। आत्माभिव्यक्तिरूपस्य रसस्य सफलप्रकाशकतया काव्यस्य आत्मतत्त्वं रसध्वनि:। भारतीयविचारदृष्ट्या कथानकस्यापेक्षया चारित्र्यस्य अधिकं महत्त्वम्। चारित्र्यापेक्षया च आत्मभूतस्य रसस्य। एतस्मात् अवेक्षणात् ज्ञायते अरस्तूमहोदयस्य विचारापेक्षया भरतमुनेः विचार: श्रेष्ठतरः।

अपि च अरस्तूमहोदय: स्वीकरोति - नाट्ये रसभावचरित्रचित्रणापेक्षया कथानकस्य एव अधिकं महत्त्वम्। तदेव न युक्तियुक्तम्। यतो हि घटनाया: कर्तृत्वरूपेण पात्रमेव संघटकम् । पात्रं विना कथानक कथं वा घटेत? कथानकेन सह पात्राणां मनोवृत्तिनां, मनोवृत्तिद्वारैव सामाजिकमनोवृत्तयः प्रेरिता: प्रभाविताश्च भवन्ति। अत: चरित्रचित्रणं विना कथानकं भवितुं नार्हति।

**कथावस्तुनः आयाम: -**

अरस्तूमहोदयस्य मतानुसारे कथावस्तुनः आयाम: यथासम्भवं सूर्यस्य एकपरिक्रमणस्य (दिवारात्रस्य) किञ्चिद् तदधिकसमयस्य वा सीमायाम् आबद्धः, यद्यपि अरस्तूमहोदयात् पूर्वस्मिन् काले तथा समयबन्धनं नासीत्।[23]

भारतीये नाट्यशास्त्रे एतादृश: कथावस्तुन: सीमित आयाम: अपेक्षित: नास्ति। अत एव संस्कृतनाटकेषु तादृशं समयबन्धनं नावलोक्यते। कथानकस्य पूर्णताया: प्रदर्शने समयसीमाबन्धनं नाप्युचितं भवति।

**कथानकस्यैकान्वितिः -**

भारतीयनाट्यशास्त्रे आधिकारिककथावस्तु आधारीकृत्य एव प्रासङ्गिकानाम् अन्यकथानकानां पञ्चसन्धिद्वारा वर्णनस्य विधानं वर्त्तते। तेषां समेषां निर्बहणसन्धौ ऐकार्थोपनयनद्वारा कार्यान्विते निरूपणं दृश्यते। तथैव अरस्तूमहोदयस्य 'काव्यशास्त्रेऽपि' कथानकस्य एकान्विते: (Unity of plot) प्रतिपादनं दृश्यते। मुख्यकथानकस्य कार्यान्वित्या सह स्थानान्वितिकालान्वित्योः अपि आवश्यकत्वं प्रतिपादितं विद्यते। परन्तु भारतीयनाट्यशास्त्रे कालान्विते: स्थानान्वितेश्च उपेक्षा एव अवलोक्यते। यत: पूर्णकथानकप्रयोगे एतयो: अन्वित्यो: विधानं नैव सम्भवम् ।

**कथावस्तुन: पूर्णता -**

अरस्तूमहोदयस्य विचारदृष्ट्या आदिमध्यावसानयुक्तमेव कथावस्तुपूर्णम्। तादृशेन एव पूर्णेन नाट्यवस्तुना भाव्यम्। परन्तु भारतीयनाट्यशास्त्रे उपर्युक्तपूर्णत्वसमन्वितमेव कथावस्तु नाटकस्य सफलतायै बाधकः एव भवति, यदि तेन सहृदय-सामाजिक-जिज्ञासापरितोष: न जायते। अत: भारतीयमतानुसारेण जिज्ञासा परितोष: एव पूर्णताया: निकषः ।

**कथानकस्य सम्भाव्यता -**

अरस्तूभरतयो: मतं कथानकसम्भाव्यताविषये समानमेव। सम्भाव्यतागुणद्वारेणैव कथानकस्य काम्यत्वम्, अन्यथा असम्भाव्यतया निरुपाख्यप्रसङ्गापत्या तत्र सहृदयानां प्रवृत्तिरेव न स्यात्।

**इतिवृत्तस्य सहजविकासः -**

महामुनिभरतमते इतिवृत्तस्य सहजविकास: नाट्यसन्ध्यङ्गद्वारैव भवति। तथैव अरस्तूमतेऽपि संवृति-विवृति-स्थितिविपर्ययाभिज्ञानद्वारा कथानकस्य सहजविकासो भवति।

**कुतूहलम् -**

कुतूहलस्य तत्परितोषस्य च निरूपणं अरस्तूमहोदयस्य नाटकीयकथानके नितराम् आवश्यकम्। सामाजिकानां पुरत: कुतूहलोत्पादनाय घटनानामुपस्थित्या अकस्मादेव विचारणीयम्, परन्तु तत्र सूक्ष्मरूपेण कार्यकारणभावेनापि भवितव्यम्।

भरतमुनि: 'नाट्यशास्त्रे' सन्धिप्रयोजनप्रतिपादनावसरे आश्चर्यवदभिख्यातम्'[24] इति कथानके आकस्मिकताया: कुतूहलस्य प्रतिपादनं कृतवान्। 'कौतूहलोत्तरावेशो भवेत्तु परिभावना'[25] इति मुखसन्धेः परिभावनारूपप्रभेदे तथा ' अद्भूतस्य च संप्राप्तिर्भवेत्तद्रूपगूहनम्'[26] इति निर्वहणसन्धे: उपगूहनरूपप्रभेदे कुतूहलस्य स्पष्टं प्रतिपादनं भवति।

अरस्तूमहोदय: त्रासद्याः संघटनार्थं प्रस्तावना-उपाख्यान-उपसंहाराणां निरूपणं कृतवान् । तद्वदेव भारतीयनाट्यशास्त्रेऽपि प्रस्तावना-प्रासङ्गिककथावस्तु-फलागमादिषु तेषां प्रतिपादनं भवति।

अनेन प्रकारेण मया अरस्तूभरतयो: नाट्यविषयकं मौलिकतत्त्वं समालोचितम्। अन्ते च भगवत: श्रीनीलाद्रिनाथस्य तथा भगवत्या: तारिणिदेव्या: पादपद्मयुगले प्रणम्य विरमामि विस्तरात् इति ।।शम्।।

**संदर्भ सूची**


1. नाट्यशास्त्रे. 1.104
2. नाट्यशास्त्रे. 1.108
3. नाट्यशास्त्रे. 1.118
4. नाट्यशास्त्रे. 7.84
5. नाट्यशास्त्रे. 21.129
6. नाट्यशास्त्रे. 21.131
7. नाट्यशास्त्रे. 17.123
8. काव्यप्रकाशे चतुर्थोल्लासे
9. अभिनवभारती (अभिनवगुप्तः)
10. दशरूपके. 1.07
11. साहित्यदर्पणे. 3.48
12. नाट्यशास्त्रे. 1.110-116

13. नाट्यशास्त्रे. 1.110-116
14. Tragedy, then is, an imitation of an action that is serious, complete, and of a certain magnitude, in language embellished with each kind of artistic ornament, the several kinds being found in separate parts of play, in the form of action, not of narrative through pity and fear effecting the Proper Purgation of these emotions. Poetics VI
15. Every tragedy, therefore, must have six parts, which parts determine its quality - namely, plot, Character, Diction, Thought, Spectacle, Song. Two of the Parts Constitute the medium of imitation, one the manner, and three the object-of imitation. Ibidem.
16. The true difference is that one (history) relates what has happened, the other (poetry) what may happen.Poetry, therefare, is a more philosophical and a higher thing than history. Ibdem X
17. नाट्यशास्त्रे. 21.118
18. नाट्यशास्त्रे. 17.121
19. नाट्यशास्त्रे. 17.122
20. नाट्यशास्त्रे. 21.02
21. The plot, then, is the first principle, and, it where, the soul of a tragedy. Poetics VI
22. नाट्यशास्त्रे. रसप्रकरणे
23. Poeticsv
24. नाट्यशास्त्रे. 21.54
25. नाट्यशास्त्रे. 21.75
26. नाट्यशास्त्रे. 21103